**संस्कृत-वार्ता:**

**दिनाङ्क :-22.08.2024**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री-पोलैण्डयात्रा</u>**

**प्रधानमन्त्री नरेन्द्रमोदी अद्य वॉरसॉनगरे स्वकीयेन समकक्षेण पोलैण्डदेशीयेन डोनाल्डटस्कइत्यनुना सह प्रतिनिधिमण्डलस्तरीयां वार्तां विधास्यति। अवधेयं वर्तते प्रधानमन्त्री श्रीमोदी पोलैण्डदेशस्य आधिकारियात्रां प्रति गतवान्। आशास्यते यत् उभौ नेतारौ द्विपक्षीयसम्बन्धानां समीक्षां करिष्यत: अथ च अनेकेषु पक्षेषु विचाराणाम् आदानप्रदानं विधास्यत:। श्रीमोदी तदनन्तरं पौलेण्डदेशीयेन राष्ट्रपतिना एन्ड्रेजडूडाइत्यनेन सहापि मेलनं करिष्यति। कार्यक्रमात् एतस्मात् प्राक् प्रधानमन्त्रिण: श्रीमोदिन: भव्यं स्वागतमपि भविष्यति। असौ अज्ञातसैनिकेभ्य: पुष्पाञ्जलिं समर्पयिष्यति। प्रधानमन्त्री श्रीमोदी ह्य: रात्रौ वॉरसॉनगरे प्रवासिन: भारतीयान् सम्बोधयन् न्यगादीत् यत् अद्यत्वे समये भारतं अन्यै: देशै: सहास्ति अपि च सर्वेषां विकासं कल्याणं च वाञ्छति। प्रधानमन्त्री अग्रे प्रख्यापितवान् यत् भारतस्य दृष्टिकोणं स्पष्टमस्ति यतौ हि अयं देश: युद्धं न वाञ्छति क्षेत्रेषु च शान्तिं स्थापयितुं निरतोऽपि विद्यते। ध्यातव्यमस्ति यत् श्रीमोदी द्वयो: देशयो: पोलैण्ड- यूक्रेनयो: निजाधिकारियात्राया: प्रथमे चरणे ह्य: वॉरसॉनगरं सम्प्राप्तवान्।**

**<u>निर्वाचनायोग:-हरियाणाराज्यम्</u>**

**निर्वाचनायोगेन हरियाणाराज्ये रिक्त-प्रक्रियाया: परिणामस्य घोषणा राज्ये विधानसभा-निर्वाचनं यावत् स्थगीकृता। आयोगेन हरियाणा-आरिक्ष-बले षड्शताधिकपञ्चसहस्रं रिक्तीषुं हरियाणालोकसेवाद्वारा च विभिन्नेषु पदेषु पूरणप्रक्रियायाम् आदर्शाचारसंहिताया: कथितोल्लङ्घनस्य विषये संज्ञानम् अधिगतम्। ध्येयं वर्तते यत् कांग्रेसनेता जयरामरमेश: अस्मिन् प्रकरणे परिवेदनां प्रख्यापितवान्।**

**<u>राष्ट्रपति:दीक्षान्तसमारोह:</u>**

**राष्ट्रपतिदासीना द्रौपदीमुर्मुवर्या दूरस्थेषु क्षेत्रेषु प्राप्तान्तर्जालस्य कारणेन आन्तर्जालिक वृत्यवसरस्य सृजनस्य प्रशंसां कृतवती। हरियाणाराज्यस्य फरीदाबादनगरे जे.सी.बोस् विज्ञान-प्रौद्यागिकीयविश्वविद्यालयस्य पञ्चमं दीक्षान्तसमारोहं सम्बोधयन्ती राष्ट्रपति: उक्तवती यत् समग्रं विश्वं चतुर्थ्या: औद्योगिकक्रान्ते: युगे अस्ति। एवमेव भारतदेश: अपि प्राप्तावसराणां लाभं गृहीतुं समाह्वनानि च दूरीकर्तुं सज्जो वर्तते।**

भारतर्तुविज्ञान-विभागः

भारतर्तुविज्ञानविभागेन आगामिषु केषुचित् दिवसेषु असम-मेघालय-त्रिपुरा-राज्येषु अतिवृष्टिः अनुमानिता। चतुर्विंशतिहोरावधौ केरलराज्ये लक्षद्वीपे च अत्यधिकं वृष्टेः सम्भावनापि प्रकटिता। विभागेन उत्तराखण्ड-जम्मूकश्मीर-लद्दाख-हिमाचलप्रदेश-उत्तरप्रदेश-पूर्वीय-राजस्थान-पञ्जाब-हरियाणा-दिल्ली-राज्येषु मध्यमस्तरीयाः वृष्टिः पूर्वानुमानितास्ति।

अन्तरिक्षदिवसः

शुक्रवासरे देशे प्रथमः राष्ट्रियः अन्तरिक्षदिवसः आचर्यते। अस्मिन् वर्षे अस्य महोत्सवस्य विषयः अस्ति चन्द्रस्पर्शनेन जीवनस्पर्शनम् – भारतस्य अन्तरिक्षगाथा इति । राष्ट्रपति द्रौपदी मुर्मू नवदिल्लीस्थे भारतमण्डपमे आयोजितस्य मुख्यकार्यक्रमस्य उद्घाटनं करिष्यति। अन्तरिक्षराज्यमन्त्री डॉ. जितेन्द्रसिंहः ह्यः वार्ताहर-सम्मेलनं सम्बोधयन् अवदत् यत् गतवर्षे अस्मिन् दिने चन्द्रयान-तृतीयस्य प्रक्षेपण-समये विक्रम-लैण्डर इत्यस्य चन्द्रमसि सुरक्षितं सरलं च अवरोहणं जातम्। तेनोदीरितं यत् भारतं चन्द्रमसि अवतीर्य चतुर्थः देशः सञ्जातः, चन्द्रमसः दक्षिणध्रुव-प्रदेशस्य समीपे अवतीर्य प्रथमः देशः च अभवत् ।

॥इति वार्ताः॥